ज्योतिष्टोमस्यैकादयो दीक्षाः। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव। सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम्। सप्तमे पुत्रादिकं न देयम् महाभूमिर्न देयेत्येवमादिदेयविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः, स्थपतीष्टिस्तथैवेत्येवमाद्यग्निविचारः कृतः"। "प्रत्यक्षोक्तप्रतिदेशोऽस्य शेषः सामनिरूपणम्। नामलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः"। "सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनातिदेशः। द्वितीये रथन्तरशब्देन गानमात्राभिधायिना गानस्यैवातिदेश्यत्वमित्येतादृशः पूर्वोक्तातिदेशस्य शेषो विचारितः। तृतीयेऽग्निहोत्रनामातिदेशः। चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः"। "स्पष्टलिङ्गादथास्पष्टात् प्रबलादपवादतः। अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः"। "अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः। तद्यथा सौर्यचरावतिदेशकानि निर्वापस्तद्धितेन देवतानिर्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि। द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः। तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते। तत्र लिङ्गमस्पष्टम् शीघ्रं तद्बुद्ध्यनुत्पादनात्। तृतीये प्रबलेन लिङ्गेनातिदेशः। तद्यथा आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु त्रित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदैवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः। प्रबलं च द्विदैवत्यत्वम् शब्दोच्चारणमात्रेण सहसा प्रतिभासात् क्रमस्तु विलम्बितप्रतीत्या दुर्बलः चतुर्थे दर्विहोमेष्वतिदेशोऽपोद्यते"।

"ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः। नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्त्तिताः"। "नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्वकमूहविचारप्रारम्भः। तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः। अवघातमन्त्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरुपोद्घातः। सवित्रश्विपूषशब्दानां विकृतिषु नास्त्यूहः। अग्निशब्दस्यास्त्यूह इत्यादिकऊहविचारारम्भः। द्वितीये सपरिकरः सामोहः। तृतीये मन्त्रोहः। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः"। "द्वारलोपोऽस्य विस्तारः कार्य्यैकत्वं समुच्चयः। ग्रहसामप्रकीर्णानि नञर्थश्चाष्टपादगाः" "दशमाध्यायस्य प्रथमे पादे बाधहेतुद्वारलोपो निरूपितः। तद्यथा स्वयंकृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धननादीनां बाधः। कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः। द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्य्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादि दक्षिणाया ऋत्विक्परिक्रयः कार्य्यः। तथा विकृतिरूपे भूनाम्न्येकाहे धेनुरूपायास्तदेव कार्य्यम्। ततो धेन्वा गवाश्वादि दक्षिणा विकृतौ चोदकप्राप्ता बाध्यते। चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्त इत्यादि समुच्चयः। पञ्चमे षोडशिग्रहः प्रकृतिगामी। स चाग्रयणपात्रादेव ग्रहीतव्य इत्यादिर्बाधप्रसङ्गागतो ग्रहादिविचारः। षष्ठे साम तृचे गेयमित्यादिर्बाध प्रसङ्गागतः सामविचारः। सप्तमे पश्वङ्गेषु हविर्भेदः। गृहमेधीयमपूर्वकर्मेत्यादिर्बाध प्रसङ्गागतः प्रकीर्णविचारः। अष्टमे नानुयाजेष्विति पर्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः"।

"उपोद्घातस्तथा तन्त्रावापौ तन्त्रस्य विस्तृतिः। आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः"। एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः"। "प्रसङ्गस्तन्त्रिनिर्णीतिः समुच्चयविकल्पने। द्वादशाध्यायपादार्था इति पादार्थसंग्रहः"। द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः सौमिकवेदेरुत्तरकालीनकर्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोस्तन्त्रित्वम् न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः अन्वारम्भणीया विकृतिष्वपि स्यात् न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वग्वाससोः समुच्चयः। आघारगतानृजुत्वसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन यवव्रीह्योर्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैन्द्राबार्हस्पत्ययाज्यानुवाक्यायुगलयोर्विकल्प इत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समु-